मनुविष्णू । "संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनात् न तु यानासनाशनात्" पैठीनसिः "संवत्सरेण पतति पतितेन सहाचरन् । याजनाध्यापनाद्यौनान्न त्वेकशयनासनात्" । पतितानभिधायाह सुमन्तुः । "यश्च तैर्यौनमौखस्रौवाणां सम्बन्धानामन्यतमेन सह संवत्सरं सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यात्" इयात् कुर्यात् द्वादशवार्षिकमित्यर्थः मौखं मुखसाध्यमध्यापनं स्रौवं स्रुवसाध्यं याजनमित्यर्थः अत्र याजनादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते प्रा०वि० । हारीतः । "संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनादेकशय्यैकभोजनात्" बृहस्पतिः । "षाण्मासिके तु संयोगे याजनाध्यापनादिना । एकत्रासनशय्याभिः प्रायश्चित्तार्द्धमाचरेत्" । "याजनादिकं लघुगुरुभेदेन द्विविधं भवति तत्र गुरुणाज्ञानकृतेन याजनादिना एकैकेन सद्यःपातः तेनैवाज्ञानकृतेन वारद्वयाभ्यासात् । लघुनि याजनादावज्ञानकृते संवत्सरेण पतति तस्मिन्नेव ज्ञानकृते वत्सरार्द्धेनेति व्यवस्था । तथाहि याजनं योनिसम्बन्धमित्यत्र देवलवचने पतितेन सहोषित्वा जानन्निति पूर्ववचनस्थस्य जानन्निति पदस्य सम्बन्धात् ज्ञानकृतत्वे गुरुत्वं दर्शितं गुरुयाजनाध्यापनादिकमाह देवलः । "आचार्य्याद् व्रतनियमशुश्रूषादिभिस्त्रयोविद्योपादानमध्ययनम् । तस्य चाचारान्वयप्रज्ञासमासामर्थ्य भक्तिशीलशुश्रूषोपनताय शिष्याय प्रदानमध्यापनं, पशुसोमाज्यपुरोडाशसोमौषधिचरुप्रभृतिभिः खदिर पलाशाश्वत्थन्यग्रोधोदुम्बरप्रभृतिभिः समिद्भिः स्रुक्स्रुवोदूखलमुषलकुठारखनित्रयूपदारुचर्म्मदर्भग्रावपवित्रभाजनादिभिर्द्रव्योपकरणैः प्रोत्साहिहोत्रध्वर्य्युब्रह्मादिभिः ऋत्विग्भिः काम्यनैमित्तिकानां पक्षादिपूर्व्वकाणां यथोक्तादक्षिणानां यज्ञानां समापनं यजनम् एतेन याजनं व्याख्यातम्" । तथा च ज्योतिष्टोमादियज्ञानां याजनं गुरु, पूर्त्तादिकर्म्मणा याजनं लघु । कौर्म्मम् "याजनं योनिसम्बन्धं तथैवाध्यापनं द्विजः । कृत्वा सद्यः पतेज्ज्ञानन् सहभोजनमेव च" । यमः । "असत्प्रतिग्रहीतारस्तथैवायाज्ययाजकाः । नक्षत्रैर्जीव्यते यश्च सोऽन्धकारं प्रपद्यते" । वसिष्ठः । "शूद्रधानस्यभोक्तव्यश्चौरस्य च विशेषतः । न त्वेव बह्वयाज्यस्य यश्चोपनयते बहून्" । बोधायनः । "बहुप्रतिग्राह्यं वाऽप्रतिगृह्याप्याज्यं वा याजयित्वाऽप्रतिग्राह्यस्य वा प्रतिगृह्य अनाशनस्थ वाऽश्वमशित्वा तरत्समन्दीयं जपेत्" । वशिष्ठः । "एतेनैव गर्हिताध्यापकयाजका व्याख्याता" दक्षिणात्यागाच्च पूताभवन्तीति विज्ञायते" "एतच्च शूद्रेतरस्त्रोपपातकादिगर्हितस्य पञ्चमहायज्ञयाजनादिविषयमिति धर्म्मप्रदीपः" प्रा०वि० । तत्रैव शूद्रपुरोहितयाजकाध्यापकादावृत्तौ यमः । "एतेषामेव सर्व्वेषां प्रत्यापत्तिस्तु मार्गताम् । भैक्षाग्निमुपयुञ्जानो द्विजश्चान्द्रायणञ्चरेत् । फलं नागह्रदे तोये स्नापयेदभिभावितम् अर्यौतसर्गेण यन्त्रान्ते तस्मात् पापात् प्रमुच्यते । अक्षारलवणं रूक्षं पिबेद्ब्राह्मसुवर्च्चलाम् । तस्योपनयनं कृत्वा व्यवहार्य्यस्तदा भवेत्" इति । फलं लब्धं धनं नागह्रदे गजमज्जनयोग्यह्रदे अविभावितम् अभुक्तम् । यन्त्रान्ते व्रतान्ते ।

**अयाज्ययाजन** न० अयाज्यस्य याजनम् । अयाज्यस्य पतितादेर्याजने । याजनं च लघुगुरुभेदेन द्विधेत्युक्तमयाज्यशब्दे । "अयाज्ययाजनैश्चैव नास्तिक्येन च कर्म्मणाम् कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः" मनुः ।

**अयाज्यसंयाज्य** न० सम्+यज-णिच्-भावे यत् ईत० । अयाज्यस्य पतितादेर्याजने "सेवायायाज्यसंयाज्यपारदार्य्यात्मविक्रयः" इति मनुः ।

**अयातयाम** पु० न यातोयामः समयोऽस्य । १अपर्य्युषिते २अनतिक्रान्तकाले ३विगतदोषे च । "छन्दांस्येवैतत् पुनराप्याययत्ययातयामानि करोति—न वा अत्र स्तुवते न शंसन्ति तच्छन्दांस्येवैतत् पुनराप्याययत्ययातयामानि करोति तैरयातयामैर्यज्ञं तन्वते" इति शत० ब्रा० । "छन्दांस्ययातयामानि" भाग० । "अयातयामानि विगतदोषाणि" श्रीधरः ।

**अयातु** पु० भीमो भीमसेनवत् यातुर्यातुधानः न०त० । १राक्षसभिन्ने २अहिंसके च योमायातुं यातुधानेत्याह ऋ० ७,१०४,१६, अयातुमराक्षसम् भा० । "हयामि देवाँ अयातुरग्ने ! ऋ०७,३४,८ अयातुः अहिंसकः भा० ।

**अयाथातथ्य** न०त० । मिथ्यात्वे । अयथातथशब्दे विवृतिः ।

**अयान** न० न यानं चलनं यस्य । १स्वभावे निसर्गे यथा जले शैत्यं अग्नेरुष्णता न हि तत् कदापि चलतीति तस्य तथात्वम् अभावे न०त० । २गमनाभावे । यानं गमनं वाहनञ्च न०ब० । ३यानशून्ये त्रि० ।

**अयानय** पु० द्यूते सर्व्वशारगन्तव्यशेषसोमाभूते शीर्षस्थाने व्युत्पत्तिविवरणम् मतृकृतसरलायाम् यथा आनीयन्ते शारा अस्मिन् इत्यानयः अयेन दक्षिणावर्त्तेनापसव्य-